**संस्कृतवार्ता:**

**दिनाङ्क :-16.12.2024**

**प्रात: - 06:55**

**श्रीलंका-राष्ट्रपति/भारत**

**प्रधानमन्त्री नरेन्द्रमोदी श्रीलङ्का-देशस्य राष्ट्रपति: अनुराकुमार-दिसानायके इत्येष: च अद्य नवदिल्ल्यां द्विपक्षीय वार्ता: करिष्यतः। तौ परस्परहितानां विषयेषु चर्चां करिष्यतः। भारतस्य त्रिदिवसीययात्रायां श्रीदिसानायके: ह्यः एव नवदिल्ल्यां संप्राप्तवान्। सूचनाप्रसारणराज्यमन्त्री डॉ. एल मुरुगनः तस्य स्वागतं कृतवान् । श्रीलङ्का-देशस्य राष्ट्रपतिः राष्ट्रपतिपदासिनया द्रौपदीमुर्मुः वर्यया उपराष्ट्रपतिना जगदीपधनखडेन च सहापि मेलनं करिष्यति। सः बिहारस्य बोधगयायाम् अपि गमिष्यति। राष्ट्रपतिपदं स्वीकृत्य राष्ट्रपते: श्रीदिसानायके इत्यस्य भारतस्य प्रथमा यात्रा अस्ति । अनया यात्रया द्वयोः देशयोः बहुपक्षीयं परस्परं लाभप्रदं च सहकार्यं अधिकं सुदृढं भविष्यति इति अपेक्षा अस्ति।**

**पीएम सीएस बैठक**

**प्रधानमन्त्रिणा नरेन्द्रमोदिना राज्यै: आग्रहः कृतः यत् ते लघुनगराणां उद्यमिनां कृते उपयुक्तानि स्थानानि चिन्तयित्वा तेषां सुविधायै कार्यं कुर्वन्तु इति। नवदिल्ल्यां मुख्यसचिवानां चतुर्थं राष्ट्रियसम्मेलनं सम्बोधयन् श्रीमोदी राज्यै: अनुपालनस्य सरलीकरणं कर्तुं उक्तवान्, येषां अभावेन प्रायः नागरिकानां उत्पीडनं भवति। सः प्रतिभागिभि: आग्रहं कृतवान् यत् राज्यैः नागरिकसहभागिताम् अथवा जनसहभागीत्वम् प्रोत्साहयितुं शासनस्य प्रतिरूपे परिष्कार: करणीयः। श्रीमोदी अवदत् यत् संशोधने, प्रदर्शने, परिवर्तने च ध्यानं दातुं महत्त्वपूर्णम् अस्ति, तथा च सर्वकारस्य विभिन्नानां उपक्रमाणाम् विषये जनान् सूचयितुं अपि महत्त्वपूर्णम् अस्ति।**

**महाराष्ट्र**

**महाराष्ट्रे ह्यः भारतीयजनतापार्टीति दलस्य नेतृत्वस्य महायुति-सर्वकारस्य मन्त्रिपरिषदि उनत्रिंशत्मन्त्रिणः सम्मिलिताः। एते नागपुरस्य राजभवने एकस्मिन् समारोहे शपथवचनग्रहणं कृतवन्तः, मंत्रिमंडले त्रयस्त्रिंशत् मन्त्रिणः षट् राज्यमन्त्रिणः च सन्ति। राज्यपालेन सी.पी.राधाकृष्णन् इत्यनेन नवनियुक्तेभ्यः मन्त्रिभ्यः शपथवचनं आकारितम्। अस्मिन् अवसरे मुख्यमंत्री देवेन्द्रफडणवीस: उपमुख्यमन्त्रिणौ एकनाथशिण्दे, अजीतपवारौ च उपस्थितौ आस्ताम् ।**

**दक्षिणकोरिया राष्ट्रपति-बाइडेन**

**दक्षिणकोरियादेशस्य कार्यवाहकराष्ट्रपतिः हान-डक-सू इत्यनेन अमेरिकादेशस्य राष्ट्रपतिना जो-बाइडेन इत्यनेन सह दूरभाषमाध्यमेन वार्तालापः कृतः, द्वयोः देशयोः एकरूपतां यथावदेव संस्थापनाय विकासाय**

च प्रतिज्ञा कृता। दक्षिणकोरियादेशस्य राष्ट्रपतिकार्यालयेन एकस्मिन् वक्तव्ये उक्तं यत्, हानः बाइडेन् इत्यनेन सह षोडश-निमेषं यावत् दूरभाषे वार्तालापं कृतवान्, अवधेयं वर्तते यत् राष्ट्रपतिः यून् सुक् येओल् इत्यस्य उपरि ह्यः राष्ट्रियसभया महाभियोगः कृतः दिसम्बर् मासस्य तृतीये दिनाङ्के मार्शल लॉ इत्यस्य प्रयोगः अपि जातः।

## महिलाक्रिकेट्

महिलाक्रिकेट्-क्रीडायां भारतेन गतरात्रौ नवीमुम्बईनगरस्य डीवाई-पाटिल्-क्रीडाङ्गणे तिसृणां क्रिकेट्-श्रृङ्खलानां प्रथमायां विंशतिः प्रति विंशतिः अन्ताराष्ट्रिय-क्रीडायां वेस्ट्-इण्डीज-दलं सप्तचत्वारिंशत् धावनांकैः पराजितम्।